Roll No. : .......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# A–212

## B.A. (Part–II) Examination, 2023

## SANSKRIT

Paper - II

## (वैदिक साहित्य, गद्य साहित्य एवं व्याकरण)

*Time : 3 Hours* ] [ *Maximum Marks : **100***

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर–सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए। प्रत्येक प्रश्न में विकल्प का चयन कीजिए (उत्तर–सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर–सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वे प्रश्नाः अनिवार्याः सन्ति। केषाञ्चित् **पञ्चानां** प्रश्नानां उत्तराणि संस्कृतभाषायां देयानि। 2×10=20

(i) ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्ते कः स्तूयते ?

(ii) 'दस्योर्हन्ता' को देवः ?

(iii) विष्णु सूक्तस्य ऋषिः कोऽस्ति ?

(iv) 'विद्ययाऽमृतमश्नुते' इति वचनं कस्यामुपनिषदि वर्तते ?

(v) 'हिरण्यगर्भ' इति पदेन कोऽभिधीयते ?

(vi) 'समानी व आकूती:' इति वचनं ऋग्वेदस्य कस्मिन् सूक्ते वर्तते ?

(vii) चन्दापीडं क: उपदिशति ?

(viii) शुकनासोपश: कस्य ग्रन्थस्य अंश: अस्ति ?

(ix) ''नम: स्वस्ति-स्वाहा: स्वधाऽलं-वषड्-योगाच्च॥'' इति सूत्रस्य कोऽर्थ: ?

(x) उभयपद प्रधान: समास: क: ?

## खण्ड–ब

**नोट** :– सप्त प्रश्नेषु केषाञ्चित् **पञ्चानां** प्रश्नानां उत्तराणि देयानि। उत्तर सीमा **200** शब्देषु भवितव्यम्।

2. कयोश्चिद् द्वयो: मन्त्रयो: व्याख्या कार्या–

(i) यो हत्वाहिमरिणात्सप्त सिन्धून्, यो गा उदाजदपधा बलस्य।
यो अश्मनोरूतरग्निं जजान, संवृक्समत्सु स जनास इन्द्र:॥ 4

(ii) संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे संजानाना उपासते॥ 4

(iii) विमृलीकाय ते मनो रथीरश्वं न सन्दितम्।
गीर्भिर्वरुण सीमहि॥ 4

3. कयोश्चिद् द्वयो: मन्त्रयो: व्याख्या कार्या–

(i) असूर्या नाम ते लोका अंधेन तमसावृता:।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनोजना:॥ 4

(ii) हिरण्यमयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत् त्वं पूषन्नापावृणु सत्य धर्माय दृष्टये॥ 4

(iii) अन्धं तम: प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायांरता:॥ 4

4. कयोश्चिद् द्वयो: गद्यांशयो: हिन्दी भाषायां अनुवादो विधेय:–

(i) कामं भवान् प्रकृत्यैव धीर: पित्रा च महता प्रयत्नेन समारोपित संस्कार: तरल हृदयम् प्रतिबुद्धञ्च मदयन्ति धनानि, तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्। इदमेव च पुन: पुनरभिधीयसे विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि, धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खली करोति लक्ष्मीरिति। सर्वथा कल्याणै: पित्रा क्रियमाणमनुभवतु भवान् नवयौवराज्याभिषेक मंगलम्। 4

(ii) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिभरूपत्वममानुष शक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा सर्वा। अविनयानामेकैकमप्येषामायतनम् किमुत समवाय:। यौवनारम्भे च प्राय: शास्त्रजल प्रक्षालन निर्मलापि कालुष्यमुपयाति बुद्धि:। अनुज्झित धवलतापि सरागैव भवति यूनां दृष्टि:। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवन समये पुरुषं प्रकृति:। 4

(iii) न परिचयं रक्षति। नाभिजनमीक्षते न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ह्यं गणयति। न श्रुतमाकर्णयिति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमवबुध्यते। न लक्षणं प्रमाणीकरोति। गन्धर्वनगर लेखेव पश्यत इव नश्यति। 4

5. सूर्य सूक्तस्य/विष्णु सूक्तस्य वा सारांशं लिखत। 8

6. (क) अधोलिखितेषु चतुर्णां वाक्यानां वाच्य परिवर्तनं करणीयम्– 1×4=4

   (i) लता प्रश्नं पृच्छति।

   (ii) त्वं हसिष्यसि।

   (iii) अहं स्नानं करोमि।

   (iv) सः गीतं गायति।

   (v) बालिकाः हसन्ति।

   (ख) द्वन्द्व समासस्य भेदानां सोदाहरणं विवेचनं कुरुत। 4

7. अधोलिखितेषु रेखांकितपदेषु प्रयुक्तविभक्तेः कारणं सूत्रोल्लेख-पूर्वकं वर्ण्यताम्– 1×8=8

   (i) <u>नेत्रेण</u> काणः।

   (ii) <u>विद्यालयं</u> निकषा गृहम्।

   (iii) <u>शिशुभ्यः</u> दुग्धम् रोचते।

   (iv) गंगा <u>हिमालयात्</u> प्रभवति।

   (v) <u>अन्नस्य</u> हेतोः निवसति।

   (vi) <u>रामेगते</u> दशरथः प्राणान् अत्यजत्।

   (vii) <u>बलिं</u> याचते वसुधाम्।

   (viii) <u>यवेभ्यो</u> गां वारयति।

8. अधोलिखितेषु केषाञ्चित् चतुर्णां समस्तपदानां विग्रहं कुरुत, समासस्य नाम लिखतु– 2×4=8

   (i) कूपपतितः

   (ii) निर्मक्षिकम्

   (iii) मातापितरौ

   (iv) पीताम्बरः

   (v) कृष्णसर्पः

   (vi) पञ्चपात्रम्

   (vii) शङ्कुलाखण्डः

   (viii) अक्षशौण्डः

## खण्ड–स

**नोट** :– अधोलिखितेषु चतुर्षु प्रश्नेषु कयोः द्वयोः विस्तृतं वर्णनं करणीयम्। उत्तर सीमा **500** शब्देषु भवितव्यम्।

9. 'शुकनासोपदेशम्' आधारीकृत्य कस्यापि <u>एकस्य विषयस्य</u> वर्णनं क्रियताम्-शुकनासस्य चरित्रचित्रणम् **अथवा** लक्ष्मीस्वरूपम्। 20×1=20

10. ईशावास्योपनिषदस्य सारांशं लिखत। 20

11. अधोलिखितेषु <u>पञ्चानां सूत्राणां</u> सोदाहरणं व्याख्या कार्या– 4×5=20

    (i) नदीभिश्च

    (ii) चतुर्थीतदर्थाऽर्थ-बलि-हित-सुख-रक्षितैः

    (iii) उपमानानि सामान्यवचनैः

    (iv) प्रादिभ्यो धातुजस्य वाच्यो वाचोत्तर पदलोपः

    (v) द्वन्द्वे धि

    (vi) नञ्

    (vii) सप्तमी शौण्डैः

    (viii) अवादयः क्रुष्टाद्यर्थे तृतीयया

    (ix) संख्यापूर्वं रात्रं क्लीबम्

    (x) सह सुपा

12. अधोलिखित सूत्राणां सोदाहरणं व्याख्या कार्या– 2×10=20

    (i) कर्तुरीप्सिततमं कर्म

    (ii) भीत्रार्थानां भयहेतुः

    (iii) अभितः परितः समया-निवाषा-हा-प्रतियोगेऽपि

    (iv) इत्थं भूतलक्षणे

    (v) कर्तृकरणयोस्तृतीया

    (vi) यतश्च निर्धारणम्

    (vii) पंचमी विभक्तेः

    (viii) सहयुक्तेऽप्रधाने

    (ix) यस्य च भावेन भाव लक्षणम्

    (x) अधिशीङ्स्थाऽसां कर्म।